## अहःसर्वैकदेशसङ्ख्यातपुण्याच्च रात्रेः । (८७/७८३)

अहरादिभ्यः[1] परो [2]यो रात्रिशब्दः तदन्तस्य[3] तत्पुरुषस्य अच् प्रत्ययो भवति, चकारात् [4]सङ्ख्यादेः अव्ययादेश्च । अहर्ग्रहणं द्वन्द्वार्थम् । अहश्च रात्रिश्च अहोरात्रः । सर्वरात्रः[5] । एकदेशे - पूर्वं रात्रेः पूर्वरात्रः । [6]अपररात्रः । पूर्वपरावर (२.२.१/७२४) [7]इति समासः । सङ्ख्याता रात्रिः [8]सङ्ख्यातरात्रः । विशेषणं विशेष्येण (२.१.५७/७३६) इति समासः । एवं पुण्या रात्रिः पुण्यरात्रः । सङ्ख्याव्ययादेः खल्वपि – द्वे रात्री समाहृते द्विरात्रः । त्रिरात्रः । [9]अतिक्रान्तो रात्रिम् अतिरात्रः । नीरात्रः ॥

## अह्नोऽह्न एतेभ्यः । (८८/७९०)

'राजाहःसखिभ्यष्टच्' (५.४.९१/७८८) इति[10] वक्ष्यति, तस्मिन् [11]परभूते अहन् [12]इत्येतस्य अह्न: [13]इत्ययमादेशो भवति एतेभ्य उत्तरस्य । [14]सङ्ख्याव्ययादयः प्रक्रान्ताः सर्वनाम्ना प्रत्यवमृश्यन्ते । सामर्थ्याच्चाहः-शब्दः पूर्वत्वेन नाश्रीयते । परिशिष्टानां ग्रहणम् । न हि अहःशब्दात् परोऽहःशब्दः सम्भवति । सङ्ख्यायास्तावत् – द्वयोरह्नोर्भवः द्व्यह्नः । त्र्यह्नः । अव्ययात् – अहरतिक्रान्तः अत्यह्नः । [15]निरह्नः । सर्वाह्णः । पूर्वाह्णः । अपराह्णः । सङ्ख्याताह्नः । पुण्यशब्दात् प्रतिषेधं वक्ष्यति (५.४.९०/७९४) ॥

## न सङ्ख्यादेः समाहारे । (८९/७९३)

सङ्ख्यादेस्तत्पुरुषस्य समाहारे[16] वर्तमानस्य अहःशब्दस्य अह्नादेशो न भवति । पूर्वेण प्राप्तः प्रतिषिध्यते । द्वे अहनी समाहृते द्व्यहः । त्र्यहः[17] । समाहारे इति किम् ? द्वयोरह्नोः भवः द्व्यह्नः । त्र्यह्नः । तद्धितार्थ (२.१.५१/७२८) इति समासे कृते [18]अणः (४.२.५४/१४२८) आगतस्य 'द्विगोर्लुगनपत्ये' (४.१.८८/१०८८) इति लुक् ॥

## उत्तमैकाभ्यां च । (९०/७९४)

[19]उत्तमैकाभ्यां च परस्य [20]अह्नः इत्ययमादेशो न भवति । उत्तमशब्दोऽन्त्यवचनः पुण्यशब्दमाचष्टे । [21]पुण्यग्रहणमेव न कृतं वैचित्र्यार्थम् । पुण्याहः । एकाहः । केचित् तु उपोत्तमस्यापि प्रतिपत्त्यर्थं वर्णयन्ति । तेन सङ्ख्यातशब्दादपि परस्य न भवति, सङ्ख्याताहः इति ॥

---

1. प्रातिपदिकेभ्यः इत्यधिकम् फ. 2. यो नास्ति फ. 3. प्रातिपदिकस्य इत्यधिकम् क. फ. 4. सङ्ख्यादेः नास्ति फ. 5. मध्यरात्रः इत्यधिकम् फ. 6. अपररात्रः नास्ति फ. 7. इत्यादिना क. 8. सङ्ख्यातरात्रः नास्ति फ. 9. अतिक्रान्ता रात्रिः क. ह. 10. प्रत्ययं इत्यधिकम् फ. ह. 11. परतः क. 12. इति शब्दस्य ब.फ. 13. इत्यादेशो फ. 14. सङ्ख्यादयः फ. 15. निरह्नः नास्ति फ. 16. च इत्यधिकम् क. 17. सप्ताहः दशाहः इत्यधिकम् ह. 18. अण् तस्य क. 19. उत्तमब्दात् एकशब्दात् च ब. क. फ. 20. अह्नः नास्ति क. फ. 21. पुण्यशब्दग्रहणमेव क. फ. ह.